गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश मे - ६ रुपये विदेश में - १० रुपये एक प्रति - ६० पैसे

खेदाभिव्यक्तिः—

हमें अपने पाठकों को सखेद सूचित करना पड़ रहा है कि कुछ कठिनाइयों के कारण हम आपकी सेवा में पत्रिका के अंक नवम्बर १९७४ के बाद नियमित रूप से प्रस्तुत न कर सके। अब बाध्य होकर हमें वर्तमान "आयुर्वेद अंक" को ६ मास के संयुक्त अंक के रूप में प्रस्तुत करना पड़ रहा है। आशा है आप सहयोग की भावना रखते हुए हमारी इस व्यवस्था को स्वीकारेंगे तथा पत्रिका के प्रति प्रेम व सद्भावना बनाये रखेंगे।

प्रचारार्थ गुरुकुल पत्रिका का वार्षिक चन्दा ४) रु० निर्धारित था। किन्तु निरन्तर बढ़ती हुई महंगाई तथा कागज के मूल्य में अत्यधिक वृद्धि के कारण अब ६) रु० वार्षिक चन्दा तय किया गया है। आशा है आप गुरुकुल पत्रिका के यथापूर्व ग्राहक बने रह कर हमें उपकृत करेंगे।

हम पूर्ण आशावान् हैं कि अब नियमित रूप से प्रति मास पत्रिका आपकी सेवा में पूर्ववत् प्रस्तुत होती रहेगी।

—सम्पादक

ओ३म्

गुरुकुल-पत्रिका

आयुर्वेद-अङ्कः

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

मार्गशीर्ष-वैसाखः २०३१, दिसम्बर ७४ मई ७५, वर्षम्-२७, अङ्काः ४-८, पूर्णाङ्का ३१२-३१७,

श्रुति सुधा

ऋक् १०, मण्डल-९७ सूक्त, मन्त्र ६.

यत्रौषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग्रक्षोहामीव चातनः ॥

यत्र ओषधीः समग्मत राजानः समितौइव ।
विप्रः सः उच्यते भिषक् रक्षःहा अमीवऽचातनः ॥

(यत्र) जिस देश में (ओषधी) औषधियां (समग्मत) रोगो के विरुद्ध प्रयुक्त होती हैं जिस तरह (राजान.) राजा (समितौ) युद्ध मे शत्रुओ के विरुद्ध सन्नद्ध होते हैं, उस देश म उन औषधियों का प्रयोग करने वाला (विप्रः) ज्ञानवान पुरुष (भिषक्) भिषक् कहा जाता है । वह भिषक् (रक्षोहा) रक्षों का मारने वाला होता है अर्थात् रक्षरूप मानसिक आधियो का नष्ट करने वाला होता है । और (अमीवचातन.) और अमीव अर्थात् शारीरिक व्याधियो का नाशक होता है ।

इस वेद मन्त्र में भिषक् शब्द की कैसी सुन्दर व्याख्या है । यह मन्त्र ऋग्वेद के दशम मण्डल के ९७सूक्त का ६ठा मन्त्र है । इस सूक्त का ऋषि भिषक् है, देवता ओषधि है और छन्द अनुष्टुप् है ।

कहा जाता है कि अथर्व ऋषि का पुत्र भिषक् ऋषि था जो कि इस सूक्त का मन्त्रद्रष्टा है । इस सूक्त में २३ ऋचाएँ हैं । देवता अर्थात् विषय ओषधियों का है ।

संन्यास-वानप्रस्थ की दीक्षायें

—:o:—

किसी भी संगठन को आन्दोलन के रूप में बदलने के लिए तथा मानवमात्र तक कार्यक्रम पहुंचाने के लिए समर्पित एवं कर्मठ कार्यकर्त्ताओं की आवश्यकता होती है, जो कि अपनी आहुति देकर संगठनरूपी यज्ञ को प्रज्वलित करते हैं। आर्य समाज को पिछले सौ वर्षों में व्यापक बनाने का सर्वाधिक श्रेय उन त्यागी, तपस्वी, पूज्य संन्यासी महानुभावों को है, जिन्होंने सर्वस्व त्याग करके अहर्निश आर्य समाज के लिए कार्य किया। हमारे पूर्वजों की वह परम्परा चलती रहे इसके लिए यह आवश्यक है कि आर्य महानुभाव वानप्रस्थ और संन्यास आदि की दीक्षा लेकर समाजसेवा के कार्य में जुटने का संकल्प लें। इसी भावना से शिविर के अन्तिम दिन १२ जून को दीक्षा यज्ञ का आयोजन किया जायेगा। जिसमें—

एक वर्ष, दो वर्ष अथवा पूरा समय देकर समर्पण के साथ कार्य करने वाले व्यक्ति संकल्प ग्रहण करेंगे। वानप्रस्थ और संन्यास आश्रम की दीक्षा दी जाएगी। अतः वानप्रस्थ व संन्यास दीक्षा ग्रहण करने वाले व्यक्ति ६ जून तक शिविर स्थल गुरुकुल सिंहपुरा में पधारें।

१. संन्यास से पूर्व होने वाले आवास व सात्विक भोजन की उचित व्यवस्था रहेगी।
२. वस्त्रादि के लिए ५० रुपया संन्यासी व वानप्रस्थी को जमा कराना होगा। इस सम्बन्ध में विशेष जानकारी के लिए पत्रव्यवहार करें।

इन्द्रवेश
उप-कार्यालय आर्य प्रतिनिधि सभा
सुभाष मार्ग, रोहतक

आर्य युवकों के लिए स्वर्ण अवसर

आर्य समाज स्थापना शताब्दी के उपलक्ष में समस्त आर्य जगत से चुने हुए युवकों का

३ जून १६७५ से १२ जून १६७५ तक सिंहपुरा गुरुकुल रोहतक में

विशाल ब्रह्मचर्य प्रशिक्षण शिविर

शिविर के प्रमुख आकर्षण :—

१- पिछले पचास वर्षों के इतिहास में आर्य जगत का यह सर्वाधिक विशाल शिविर होगा।

२- आर्य जगत के सर्वोच्च नेता, महान विद्वान तथा उच्चकोटि के योगाचार्य युवकों को शिक्षादीक्षा देंगे।

३- शिविर में वैदिक सिद्धान्तों की गम्भीर विवेचना के साथ योगासन एवं शारीरिक प्रशिक्षण भी दिया जाएगा।

४- युवकों की दिनचर्या पूर्णरूपेण नियमित तथा अनुशासित होगी।

शिविर में भाग लेने वाले युवकों के लिए आवश्यक सूचना :—

१- प्रत्येक युवक दो लंगोट, एक खाकी निकर, एक सैण्डो बनियान, सफेद प्लीट तथा एक लाठी साथ लायें।

२- बिस्तर (एक दरी, एक चादर), थाली, लोटा, कापी, पेंसिल तथा आवश्यकतानुसार भी साथ लायें।

३- प्रत्येक युवक को २० रुपया शिविरशुल्क के रूप में देना होगा। भोजन की व्यवस्था शिविर की तरफ से होगी।

४- युवकों की आयु १६ से वर्ष से कम नहीं होनी चाहिए।

शिविर रोहतक नगर से २ मील दूर जीन्द रोड पर गुरुकुल सिंहपुरा में आयोजित होगा।

विशेष नम्र निवेदन :— प्रत्येक आर्य बन्धु से साग्रह प्रार्थना है कि आप अपने सम्पर्क के होनहार युवकों को शिविर में भेज कर इस महान यज्ञ को सफल बनाएं। इस सम्बन्ध में विशेष जानकारी के लिए श्री चन्द्रभान आर्य, कार्यालय–आर्य प्रतिनिधि सभा पंजाब, सुभाष मार्ग, रोहतक से सम्पर्क करें।

—: निवेदक :—

स्वामी इन्द्रवेश शिविराध्यक्ष	**आचार्य दयानन्द** प्रधान, आर्य युवक परिषद्	**राममेहर एडवोकेट** प्रधान, गुरुकुल सिंहपुरा
चन्द्रदेव वेदाचार्य शिविर अधिष्ठाता		**जगवीर सिंह** मन्त्री, आर्य युवक परिषद्

व्याकरणशास्त्रस्य वैशिष्ट्यम्

श्री अशोकचन्द्रगौड़ः शास्त्री

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयफल-प्रद ने कर्मनिबन्धने नाना विषयसुखदुःखज्वालामालासमाकुलिते विचित्रेऽस्मिन् जगतीतलेऽतीव दुर्लभम्मानवजन्म। मानवजन्म लब्ध्वाऽपि धर्मसाधनमन्तरा न पुरुषार्थसिद्धिः। धर्माधर्मविवेकश्च साङ्गोपाङ्गवेदाध्ययनमन्तरेण न भवितुमर्हति। तदुक्तम् भगवता पतञ्जलिना :--

"ब्राह्मणेन निष्कारणो धर्मः
षडङ्गो वेदोऽध्येयो ज्ञेयश्च"

वेदाः मानवसंस्कृतेर्मूलभूताः महानिधयः, परमेश्वरोपदिष्टत्वान्नित्याश्च। तदुक्तम् यजुर्वेदे--

"तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।"

यजु.अ.३१।मं.७॥

सतः अविनाशिनः चितः ज्ञानस्वरूपादानन्दस्वरूपात् सर्वत्र परिपूर्णात् सर्वहुतात् सर्वपूज्यात् सर्वोपास्यात् सर्वशक्तिमतः परब्रह्मणः ऋग्वेदः, यजुर्वेदः, सामवेदः, छन्दांसि-अथर्ववेदश्च उत्पन्नाः-प्रकाशिताः। अत्र जज्ञिरे अजायतेति क्रियाद्वयं वेदानामनेकविद्यावत्त्वद्योतनार्थम्। तथा तस्मादिति पदद्वयमीश्वरादेव वेदाः जाताः इत्यवधारणार्थम्। वेदानां गायत्र्यादिछन्दोन्वितत्वात् पुनश्छन्दांसीति पदम् चतुर्थस्याथर्ववेदस्योत्पत्तिं ज्ञापयतीत्यवधेयम्। शतपथादिब्राह्मणग्रन्थेभ्यः वेदमन्त्राणाम्प्रामाण्याच्च यज्ञशब्देन विष्णोः, विष्णुशब्देन च सर्वव्यापकस्य परमेश्वरस्य च ग्रहणमिति सिद्ध्यति।

तत्त्वतः वेदाः नित्याः। अत्र केचित्---वेदाः अनित्याः, शब्दमयत्वात्। यतः शब्दोऽनित्यः कार्य्यत्वाद् घटवत्। यथा घटः कृतोऽस्ति तथा शब्दोऽपि। तस्माच्छब्दानामनित्यत्वे वेदानामप्यनित्यत्वमित्याहुः। नैवं शक्यम्, शब्दाः नित्याः, शब्दानां नित्यत्वाद् वेदानामपि नित्यत्वम्। तदुक्तम् पतञ्जलिना :--

नित्याः शब्दाः। नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः।

महा.अ.१।पा.१।आ.२॥

अपि च--

"श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द" इति॥

महा.अ.१।पा.१।आ.२॥

अर्थात् वैदिकाः लौकिकाश्च सर्वे शब्दाः नित्याः। यतो हि शब्दानाम्मध्ये कूटस्थाः, विनाशरहिताः, अचलाः, अनपायाः, अनुपजनाः अविकारिणो वर्णाः सन्ति। तस्मात् शब्दाः नित्याः, शब्दानां नित्यत्वाद् वेदानामपि नित्यत्वम्। धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयसिद्धये वेदानामध्ययनमावश्यकम्। वेदाध्ययने मानवमात्रस्याऽधिकारः। तथा च यजुर्वेदे समाम्नायते---

"यथेमां वाचं कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्याभ्याँ शूद्राय चार्य्याय च स्वाय चारणाय। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुपमादो नमतु॥"

यजु.अ.२६।मं.२॥

मन्त्रोऽयं शतपथब्राह्मणे व्याख्यातः, तदनुसारमेवात्रोच्यते। सर्वैर्मनुष्यैर्वेदाः अध्येतव्या इति परमेश्वरस्यादेशः। यथा प्रत्यक्षभूता ऋग्वेदादिवेदचतुष्टयी कल्याणसाधिका वाणी सर्वेभ्यो मनुष्येभ्यः सकलजीवोपकाराय आ समन्तादुपदिष्टा, तथैव सर्वैर्विद्वद्भिः सकलेभ्यो मनुष्येभ्यो वेदचतुष्टयी वागुपदेष्टव्या। न चात्र जनपदेन द्विजपदस्य ग्रहणम्। वेदाध्ययनाध्यापने तेषामेवाधिकारत्वादिति वाच्यम्, उत्तरमन्त्रभागार्थविरोधात्। कस्य

कस्य वेदाध्ययने श्रवणे चाऽधिकारोऽस्तीत्युच्यते। ब्राह्मणक्षत्रियाभ्याम् वैश्याय, शूद्राय, चारणाय अतिशूद्रायान्त्यजाय स्वाय स्वात्मीयाय पुत्राय भृत्याय च। सर्वैः सैषा वेदचतुष्टयी श्राव्येति। यथाऽहमीश्वरः पक्षपातं विहाय सर्वोपकारकरणेन सह वर्तमानः सन् देवानां विदुषाम् प्रियः दातुर्दक्षिणायै सर्वस्वदानाय प्रियश्च स्याम् तथैव भवद्भिः सर्वैर्विद्वद्भिरपि सर्वोपकारं स प्रियाचरणम्मत्वा सर्वेभ्यो वेदवाणी श्राव्येति। यथाऽयं मे मम कामः समृध्यते तथैवैवं कुर्वताम् तावतामियमिष्टसुखेच्छा समृध्यताम सम्यग् वर्धताम्। यथाऽदः सर्वमिष्टसुखं मामुपनमति, तथैव भवतोऽपि सर्वमिष्टसुखमुपनमतु सम्यक् प्राप्नोत्विति। मया युष्मभ्यमाशीर्वादो दीयते इति निश्चेतव्यम्। यथा मया (परमेश्वरेण) वेदविद्या सर्वार्था प्रकाशिता तथैव युष्माभिरपि सर्वाऽर्थोपकर्तव्या, नात्र वैषम्यं किञ्चित् कार्यम्। यथा मम सर्वप्रियार्था पक्षपातरहिता चास्ति प्रवृत्तिस्तथैव युष्माभिराचरणे कृते मम प्रसन्नता भवति नान्यथेत्यर्थः।

यथा शरीरम् नेत्रहस्तपादाद्यङ्गमन्तरेण सुखं नावतिष्ठते, तथैव वेदाध्ययनमपि न सम्भवति वेदाङ्गमन्तरेण। तथा च वेदाङ्गानि–शिक्षा, व्याकरणम्, छन्दः, ज्यौतिषम्, निरुक्तम्, कल्पश्चेति। तथा चोक्तम्पाणिनीयशिक्षायाम् :—

"छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते।
ज्यौतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"

शरीरावयवेषु प्रधानाङ्गं मुखमिव वेदाङ्गेषु व्याकरणम्प्रधानम्। व्याकरणम् वेदस्य मुखं वर्तते। तदुक्तम् भर्तृहरिणा :—

"आसन्नम्ब्रह्मणस्तस्य तपसामुत्तमम् तपः।
प्रथमम् छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥"
वाक्यपदीये ब्रह्मकाण्डे का· ११॥

अर्थात् वेदस्वरूपस्य ब्रह्मणः समीपस्थं साधुत्वप्रकारकबोधद्वारा तपसां ब्रह्मचर्याधिशयनचान्द्रायणसन्तोषस्वाध्यायसत्यभाषणपरोपकारेश्वरचिन्तनयोगाभ्यासादीनाम्मध्ये उत्तमं दृष्टादृष्टफलजनकं तथा तपः अथ च छन्दसां वेदानाम्प्रथमं मुख्यं प्रधानम् अङ्गं व्याकरणमिति बुधाः ऋतम्भराभरणभूषिताः ऋषयः प्राहुः कथयन्ति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तोऽयं व्याकरणशब्दः। शब्दानुशासनम् इति व्याकरणस्यान्वर्थं नाम। अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते इत्यनुशासनम्, शब्दानामनुशासनम् शब्दानुशासनमिति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तः शब्दानुशासनशब्दो निष्पद्यते। शास्त्रपदेन समानाधिकरण्याच्छब्दानुशासनं नाम शास्त्रम् तच्च व्याकरणमेव। अतएव भगवता पतञ्जलिना शब्दानुशासनमिति व्याकरणस्य साक्षात् प्रयोजनमभिहितम्।

सन्ध्योपासनादिनित्यकर्मवत् व्याकरणशास्त्राध्ययनस्य किम् प्रयोजनमिति जिज्ञासायां व्याकरणमहाभाष्ये भगवता उक्तम्—"कानि पुनः शब्दानुशासनस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति।" शास्त्रादौ विषयप्रयोजनाधिकारिसम्बन्धानां निरूपणमावश्यकम्। अत एवास्य व्याकरणस्य को विषयः, किम् प्रयोजनम्, कोऽधिकारी, कश्च सम्बन्ध इति जिज्ञासायामुच्यते। लौकिकाः वैदिकाश्च शब्दाः विषयाः, तज्ज्ञानम्प्रयोजनम्, अधीनकाव्यकोशोऽनधीतव्याकरणशास्त्रस्तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावश्चात्र सम्बन्धः। व्याकरणमहाभाष्ये भगवता पतञ्जलिना अष्टादशप्रयोजनानि व्याकरणाध्ययनस्योक्तानि तद्यथा—

'कानि पुनः शब्दानुशासनस्य प्रयोजनानि'? रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—तेऽसुराः, दुष्टः

शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, ऊर्ध्वद्वांसः, विभक्ति कुर्वन्ति, यो वा इमाम्, चत्वारि, उत त्वः, सक्तुमिव सारस्वतीम्, दशम्याम् पुत्रस्य, सुदेवो असि वरुण इति।" तानीह संक्षेपेण वर्ण्यन्ते ।

वेदानां रक्षार्थमध्येयं व्याकरणम् । लोपागमवर्णविकारप्रकृतिप्रत्ययविभागज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति । अत्रेदन्तत्त्वम्—लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्राम्येदवैयाकरणः, वैयाकरणस्तु न भ्रमति, वेदार्थञ्चाप्यवस्यति । तत्र लोपागमयोरुदाहरणम् यथा—देवा अदुह्रेति । दुहेर्लङ्गो झस्यादादेशे कृते—"लोपस्त आत्मनेपदेषु" इति तलोपः, "बहुलं छन्दसीति" रुटि सति रूपमेतत् सिध्यति । लोके च अदुहत इति प्रयोगो दृश्यते । एवम् मध्याकर्तोर्विततं संजभार—इत्यत्र हकारस्य भकारादेशः । लोके संजहार इति दृश्यते । वर्णविकारो यथा—उदग्राभं निग्राभञ्चेति । हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यमिति" हकारस्य भकारः । "उदि ग्रहः" इत्यत्र "उदग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोरिति" वचनादुपिपूर्वाद् ग्रहेर्घञ् प्रत्ययः । लोके च उद्ग्राहः, निग्राह इति दृश्यते ।

ऊहः खल्वपि न सर्वैलिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्, तस्मादध्येयं व्याकरणम् । अयम्भावः—प्रकृतियागे विनियुक्तानां मन्त्राणां देवतादिवाचकपदानां विकृतियागस्य देवतादिबोधनार्थं विपरिणाम ऊह इत्युच्यते । सर्वेषाम् इष्टियागानां दर्शपूर्णमासा प्रकृतिः सर्वेषाञ्च सोमयागानामग्निष्टोमयागः प्रकृतिः । यस्मिन् यागे इति कर्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः । यत्र च "प्रकृतिवद् विकृतिः कर्तव्येति" वचनात् प्रकृतियागेनोपजीव्यते सा विकृतिः । तत्र प्रकृतिवद् विकृतिः कर्तव्येति मीमांसकराद्धान्तिते न्याये प्रकृतियागे पठितस्य "अग्नये त्वा जुष्टं निर्वपामी"ति मन्त्रस्य "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः" इति वचनानुसारेण सौर्ये चरौ विकृतियागे अग्निसम्बन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने "सूर्याय त्वा जुष्टं निर्वपामी" त्यूहार्थमध्येयं व्याकरणम् ।

"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । अत्रेदं तत्त्वम्—व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात्तदध्ययनप्रयुक्तस्य वेदार्थाज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारार्थमध्येयं व्याकरणम् ।

लघ्वर्थञ्चाध्येयं व्याकरणम् । "ब्राह्मणेनावश्यं शब्दा ज्ञेयाः" इति वचनात् शब्दानामानन्त्याच्च व्याकरणमन्तरा न केनचिल्लघुनोपायेन शब्दाः शक्याः विज्ञातुम् । लौकिकानां वैदिकानाञ्च शब्दानां साधुत्वासाधुत्वज्ञानार्थं व्याकरणमेवैकः सरलः पन्थाः । तदुक्तम् श्रीभर्तृहरिणा ।

"प्राप्तरूपविभागायाः यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥"

वाक्यपदीये ब्रह्मकाण्डे का-१२।।

अर्थात् अभिन्नात् संहृतक्रमात् अन्तः सन्निविष्टात् पश्यन्तीरूपात् शब्दतत्त्वात् प्राप्तो वर्णपदवाक्यरूपविभागो यया यद्वा अभिधेयत्वेन प्राप्तः रूपविभागः गवादिरर्थः कार्यकारणभावेन यया सा तस्याः प्राप्तरूपविभागायाः सक्रमायाः वाचः परमो रसः सारः व्यवस्थितसाधुभावः शब्दसमूहः यदाहुः "ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः" इति निष्पीडित रसस्यापि रसः सारः यदस्यत् किं हंस ऋजोष:" इति यत्तत् श्रुतिप्रसिद्धं पुण्यतमम् प्रकाशाप्रकाशयोः प्रकाशयिता प्रकाशकं ज्योतिः शब्दाख्यम् तस्य साधुशब्दसमूहस्य ज्ञाने अयं

सामान्यविशेषलक्षणवान् व्याकरणरूपः सरल उपाय इत्यर्थः। प्रतिपदोक्तशब्दपारायणरूपस्तु अत्यन्तकृच्छ्रो मार्गः। तथा च श्रूयते–बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणम्प्रोवाच नान्तं जगाम इति, तथा च लघ्वर्थमध्येयं व्याकरणम्।

असन्देहार्थञ्चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—स्थूलपृषतीमनड्वाहीमालभेत" इति। तत्र सन्देहः–स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति तत्पुरुषो बहुव्रीहिर्वेति। तां नावैयाकरणः स्वरतोऽध्यवस्यति-यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं ततस्तत्पुरुषः। सर्वव्यवहारसंपादकजात्यादिबोधकशब्दस्वरूपबोधकत्वादपि व्याकरणम्प्रशंसन्नसन्देहरूपम्भाष्योक्तम्प्रयोजनमाह भर्तृहरिर्वाक्यपदीये—

"अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥"
वाक्यपदीये। १ काण्डे। का० १३॥

अर्थात् घटपटाद्यर्थस्य प्रवृत्तौ व्यवहारे जलाहरणादिरूपार्थक्रियाकारित्वे अयं घट इत्यादि शब्दप्रयोगे वा निमित्तानि जातिगुणक्रियासंज्ञास्तेषां शब्दा एव बोधकाः सन्ति। सर्वो हि व्यवहारः शब्दमूलः, न हि कश्चित् शब्दमनुच्चार्य व्यवहर्तुमर्हति। शब्दानां तत्त्वबोधः साधुत्वबोधः यथार्थबोधो वा व्याकरणशास्त्रज्ञानमन्तरेण न भवितुमर्हति।

तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्।

स्वरतः वर्णतो वा मिथ्या प्रयुक्तः शब्दोऽभीष्टमर्थं न कथयति। तथा चोक्तम्पतञ्जलिना—

"दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ इति॥

दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। एवं हि श्रूयते तैत्तिरीये ब्राह्मणे यत्–एकदा त्वष्टुः पुत्रं विश्वरूपमिन्द्रो जघान, तदनन्तरं त्वष्टा इन्द्रसंहारार्थकर्माभिचारयागम्प्रास्तौत्। तत्र यागे सः "स्वाहेन्द्रशत्रुर्वर्द्धस्व" इति मन्त्रमुदाजहार। अत्र शत्रुशब्दः क्रियावाची, न तु संज्ञावाची। तस्मादयमर्थः–शत्रु शमयिता शातयिता संहारको वेत्यर्थः। अत्रायं सारांशः यत् त्वष्टुरिदमभिप्रेतमासीद् यद् हे अग्ने त्वमेवं वर्द्धस्व यत्तव ज्वालासमुत्पन्नः वृत्रासुरः इन्द्रशत्रुर्भवेदर्थात् इन्द्रस्य नाशको जायेत। अयमर्थस्तदैव सम्भवति यदा खलु "इन्द्रशत्रु" शब्द समासान्तोदात्तो भवेत्। समासान्तोदात्ततायामेव तत्पुरुषसमासार्थबोधो भवितुमर्हति। अत्र त्वष्टा प्रमादेन पूर्वपदप्रकृतिस्वरेण युक्तं "इन्द्रशत्रुं" शब्दं पठितवान्, तेनायं शब्दः बहुव्रीहिसमासान्तो जातः। तदाऽयमर्थः प्रस्फुटितः इन्द्रः शत्रुर्यस्येति। ततश्चाऽग्निज्वालासमुत्पन्नो वृत्रस्तत्कालमेव इन्द्रेण हतः।

यथा शुष्कैधो अग्न्यभावे कुत्रचिदपि न प्रज्वलति तथैवार्थज्ञानरहितं शब्दपारायणमात्रमध्ययनम् व्यर्थम्। तथा चोक्तम् पतञ्जलिना—

"यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥"

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणं। यः कुशलः शास्त्रोक्तरीत्या शब्दप्रयोगं जानाति शक्यलक्ष्यादितत्तदर्थविशेषे यथावत् शब्दान् प्रयुङ्क्ते सोऽनन्तं विजयमत्र स्वर्गे लोके च प्राप्नोति। अथ चाऽवाग्योगविदपशब्दै अर्थात् अपशब्दप्रयोगेण दुष्यति। उभयज्ञोऽपि वाग्योगवित् शब्दान् प्रयुङ्क्ते नापशब्दानिति ज्ञानपूर्वकशब्दप्रयोगादभ्युदयभाग्

भवति। तदुक्तम्पतञ्जलिना :—

"यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान्यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयम्परत्र
वाग्योगविद् दुष्यतिचापशब्दैः ॥"

प्रवासादेत्य शिष्येण गुरोः समक्षं नामगोत्रोच्चारणपूर्वकं प्रणामो विधेयः। अभिवादानन्तरप्रयोज्ये वचने गुरुणा प्लुतो विधेयः। यः प्लुतं कर्तुं न जानाति, सः स्त्रीवद् वक्तव्योऽयमहमिति। तदुक्तम्—

"अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥"

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥

याज्ञिकाः पठन्ति—"प्रयाजाः सविभक्तिकाः कार्याः" इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्।

व्याकरणाध्ययनमन्तरेण पदपदार्थज्ञानं न भवितुमर्हति। अतः निम्नवेदमन्त्रं व्याख्यायता भगवता पतञ्जलिना व्याकरणाध्ययनस्य शब्दरूपेण देवेनास्माकं साम्यरूपप्रयोजनसहकारेण समस्तपदानां वर्गीकरणमबोधितम् :—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आविवेश ॥

चत्वारि शृंगाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य सप्त विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतद्? रौतिः शब्दकर्मा। महो देवो मर्त्यां आविवेशेति। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्। अपर आह—

"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥"

चत्वारि वाक् परिमिता पदानि। नामाख्यातोपसर्गनिपातभेदात् चत्वारि पदानि वर्तन्ते। नामादिरूपस्य प्रत्येकस्य पदस्य परापश्यन्तीमध्यमावैखरीभेदाच्चत्वारोंऽशाः। तानि विदुर्ब्राह्मणाः ये मनीषिणः। मनस ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति। गुहायां परापश्यन्तीमध्यमारूपाणि निहितानि, नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते, चतुर्थमित्यर्थः। वैयाकरणः शास्त्रबलेन तद्बललब्धयोगेन च व्याकरणप्रदीपन गुहान्धकारं विदार्य सर्वं जानाति। तस्मात् सकलपदज्ञानाय मनीषित्वाय चाध्येयं व्याकरणम्।

पुनश्च भगवता पतञ्जलिना निम्नवेदमन्त्रमुपस्थापयता वाग्विस्तारसम्पत्तिरूपव्याकरणाध्ययनप्रयोजनम्प्रतिपादितम् :—

"उत त्वः पश्यन्न ददर्श वाच
मुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्य उशती सुवासाः ॥"
ऋ० १०।७१।४॥

अवैयाकरणः प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽपि अर्थापरिज्ञानान्न पश्यति, शृण्वन्नपि न शृणोत्येनां वाचम्। यथा पत्नी पतिं कामयमाना सम्यगलङ्कृता सती पत्ये आत्मानं दर्शयति, तथैव वाग् वैयाकरणाय अनुप्रासादिविविधालङ्कारभूषिता सती स्वात्मानं प्रकाशयति। वाङ् नो

विवृणुयादात्मानमित्यध्येयं व्याकरणम् ।

ततः असाधुशब्देभ्यो विविच्य साधुशब्दज्ञानरूपम्प्रयोजनमाह :—

"सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जनते-
भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥"
ऋ० १०।७१।२ ॥

सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा विपरीताद्विकसितो भवति । तितउ परिपवनं भवति-ततवद्वा तुन्नवद्वा । धीरा ध्यानवन्तः, मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत । अत्रा सखायः सख्यानि जानते । अत्र सखाय. सख्यानि सायुज्यानि जानते । क्व, य एष दुर्गो मार्गः एकगम्यो वाग्विषयः । के पुनस्ते ? वैयाकरणाः । कुत एतत् ? भद्रैषां लक्ष्मीर्निहिताधि वाचि । एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद् भासनात् परिवृढा भवति । अत्रेदन्तत्त्वम्-ये व्याकरणे धीराः ध्यानवन्तः सन्तः ध्यानयुक्तमनसा तत्करणकज्ञानेन तितउना सक्तुमिव वाचमसाधुभ्यो विविक्तां कृतवन्तस्ते तत्करणेन शुद्धचित्ता अत्र शब्दब्रह्मणि शब्दार्थयोरभेदबुद्ध्याऽभेदज्ञानवन्तः सायुज्यानि प्राप्नुवन्ति । ब्रह्मणा न. साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।

वाजसनेयिनः पठन्ति-आहिताग्निरपशब्दम्प्रयुज्य सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् । ततः नामकरणेषु विहित नामस्वरूपज्ञानरूपम्प्रयोजनमाह भाष्यकार :—

याज्ञिकाः पठन्ति-दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरि प्रतिष्ठितम् । तद्धि प्रतिष्ठितमम्भवति । द्व्यक्षरं चतुरक्षरं वा नामकृतं कुर्यान्न तद्धितमिति । व्याकरणं विना कृदादिज्ञानाभावान्नामकरणासम्भवात् व्याकरणाध्ययनमावश्यकम् । ततश्चान्तिमं प्रयोजनमाह सुदेवो असीति :—

"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदम् सूर्म्यं सुषिरामिव ॥"

सुदेवो असि वरुण, सत्य देवोऽसि । यस्य ते सप्त सिन्धवः सप्त विभक्तयः अनुक्षरन्ति काकुदम् । काकुदं तालु । ककुर्जिह्वा, सास्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा शोभनामूर्मि सुषिरामग्निरन्तःप्रविश्य दहति, एवं ते सप्तसिन्धव. सप्त विभक्तयस्तात्वनुक्षरन्ति । तेनासि सत्यदेवः । अत्रेदन्तत्त्वम् :— यतो हेतोर्व्याकरणज्ञानाद्वरुण ! सत्यदेवोऽसि ततो हेतोरन्येऽपि सत्यदेवा भवन्ति । यथा सच्छिद्रां लौहमयीम्प्रतिमाम्प्रविश्य ग्निस्तत्रत्यमलादिकम्भस्मीकृत्य प्रतिमां शुद्धां करोति, तथा सप्त सिन्धवः इव सप्तविभक्तयोऽपि ताल्वनुप्राप्य प्रकाशन्ते । सत्यदेवाः वयं स्यामेत्यध्येयं व्याकरणम् । श्रीमता भास्कराचार्येणाप्युक्तम् :—

"यो वेद वेदवदनं सदन हि सम्यग्
ब्राह्मयाः स वेद मपि वेदकिमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरेषु भवति श्रवणेऽधिकारी ॥"

भाषा एव मानवसमाजस्याभिप्रायाणाम्परस्परं व्यक्तीकरणस्य मुख्यं साधनं वर्तते । भाषाणां संस्कारणार्थं व्याकरणशास्त्रस्याध्ययनमावश्यकम् । रूसीजर्मनफ्रेञ्चरूमानिशाङ्गलप्रभृतीनां विदेशीयभाषाणां तुलनात्मकाध्ययनार्थञ्च संस्कृत व्याकरणशास्त्रस्य तत्तद्भाषास्थव्याकरणशास्त्रस्य चाध्ययनमावश्यकम् । यतो हि सर्वासु विदेशीय भाषासु संस्कृत शब्दानामेव मूलं दृश्यते ।

संस्कृतभाषायां विविधानां शिल्पसङ्गीतनृत्यवादित्रचित्रादिकलानाम्भौतिकरसायनजीववनस्पतिज्योतिर्विज्ञानप्रभृतीनां विषयाणां विविधाः ग्रन्थाः वर्तन्ते । तेषां सम्यगध्ययनं विधाय तदनुकूलव्यवहारेण मानवसमाजस्यातीवोपकारो भवितुमर्हति । व्याकरणज्ञानमन्तरेण पदपदार्थप्रकृतिप्रत्ययज्ञानाभावान्नैतत् सम्भाव्यते, अतोऽध्येयं व्याकरणम् ।

संस्कृतभाषायां मनुष्यपशुपक्षिवृक्षवनस्पतीनां चिकित्साविज्ञानस्य बहवो ग्रन्थाः वर्तन्ते । आयु-

निकविविधचिकित्साविज्ञानान्यपि आयुर्वेदमूलकान्येव, तद्विकासार्थमध्येयं व्याकरणम् ।

नानाविधयन्त्रादिनिर्माणविज्ञानवायुविज्ञान भूगर्भविज्ञानान्तरिक्षविज्ञाननगरविज्ञानवास्तुविज्ञान - नानाविधयानविमानविज्ञानमूलकानि ग्रन्थविशेषाणिसंस्कृतभाषायामेव वर्तन्ते । तेषामध्ययनार्थमनुसन्धानार्थञ्चाध्येयं व्याकरणम् ।

इतिहासभूगोलकृषिशस्त्रोद्यानविद्या (हार्टिकल्चर) धनुर्विज्ञानप्रभृतीनाम्महत्त्वपूर्णाना विषयाणां विविधाः ग्रन्थाः, किञ्च आन्वीक्षिक्यादयश्चतुर्दशविद्याः षोडशकलाश्च संस्कृतभाषायामेव वर्तन्ते । अतस्तेषां गूढज्ञानार्थं व्याकरणशास्त्रज्ञानमावश्यकम् । अतोऽस्मिन्नाधुनिके वैज्ञानिकयुगेऽपि व्याकरणशास्त्राध्ययनम् महत्त्वपूर्णमिति न तिरोहितम् विदुषाम् ।

वैयाकरणाः साधुशब्देष्विव घड़ा-गगरी-थाली-घर-पानी-प्रभृतिष्वसाधुशब्देष्वपि अर्थबोधकताशक्ति स्वीकुर्वन्ति । यदा असाधुशब्देभ्योऽप्यर्थोऽवगन्तुं शक्यते तर्हि किम् व्याकरणाध्ययनेन ? इति शङ्कायाम्महाभाष्ये भगवता पतञ्जलिना—"समानायामर्थावगतौ शब्देन चापशब्देन शास्त्रेण धर्मनियमः," "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इति चाभिधाय साधुशब्दैनैवार्थज्ञाने पुण्यम्भवति, नापशब्देनार्थज्ञान इति स्वीकृतम् । अत्र "एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति" प्राचीनोक्तिरपि सङ्गच्छते । एवं साधुत्वासाधुत्वज्ञानार्थम्पुण्यलाभार्थञ्च व्याकरणशास्त्रज्ञानमावश्यकम् ।

किम् बहुना, व्याकरणज्ञानमन्तरेण वेदानामर्थो न ज्ञातुं शक्यते । अतः वेदबोधिनेष्टसाधनताकं कर्म कुर्वद्भिरपि जवैर्न तत्फलम्प्राप्यते । तथा च समाम्नायते-

"स्थाणुरयम्भारहारः किलाभू-
दधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ॥"

अपि च—

"उत त्वं सख्ये स्थिरपीतमाहु-
र्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष
वाचं शुश्रुवाँ अफलामपुष्पाम् ॥"

क्व पुनर्ज्ञानम्प्रशस्यतेऽज्ञानञ्च निन्द्यते इति चेदुच्यते—लोके शास्त्रे च । लोके तावद् यः कश्चित् विद्वान् भवति स पूज्यते पुण्यफलैर्विभिर्जनैस्तदेतत् प्रत्यक्षत एव दृष्टम् शास्त्रेऽपि – स्थाणुरयं भारहारः इत्यादि । "स्थाणुर्वृक्षः" स यथा पत्रपुष्पफलानामात्मीयानाँ धारणमात्रेणैव सम्बध्यते—न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः । एवञ्च किलासावधीत्य वेदं न विजानाति योऽर्थं तस्य वेदस्याध्ययनभारमात्रमेव ह्यसौ बिभर्ति । योऽर्थज्ञ इत् सकलं भद्रमश्नुते य एवार्थज्ञो भवति न ग्रन्थमात्राध्येता स एव सकलमनवखण्डितं भद्रमश्नुते अर्थपरिज्ञानफलमश्नुते प्राप्नोति । किम् पुनस्तत् ! इह लोके पूज्यतामुपेत्य शिष्टानाम्, इतो लोकादन्तकाले 'नाकमेति" यत्रासुखं किञ्चिदपि नास्ति, आध्यात्मिकमाधिदैविकमाधिभौतिकं वा "कमिति सुखनाम, तत् प्रतिषिद्धम् । प्रतिषिध्येत "न वा अमुं लोकं जग्मुषे किञ्च नाकम् । न वा अमुं लोकं गतवते किञ्च नासुखम् । पुण्यकृतो ह्येव तत्र गच्छन्ति—इति नैगमकाण्डे २, ४, २ । तत् स्थानमेति निरतिशयम् । कस्मात् पुनरसावीदृशं स्थानमेति ? इति । उच्यते इतः । यस्मादसौ ज्ञानविधूतपाप्मा । ये हि नाकगमनप्रतिबन्धिनः पाप्मानः, ते तस्य ज्ञानेन विधूताः, अतोऽसावेति नाकम् । युक्तमन्यत्राऽपि न हि ज्ञानेन सदृशम्पवित्रमिह विद्यते इति ।

अथवा स्थाणुर्गर्दभः । स यथा चन्दनभारं वहत्येवं, तदुपभोगैर्नाभिसम्बध्यते, एवं यो ग्रन्थ-

मात्राध्येता नार्थज्ञ । एवं तावदस्मिन् ज्ञानम्प्रशस्तम् ।

उत त्वं सख्येस्थिरपीतमाहुरिति । अपि बहून् विदुषः "सख्ये" सखिभावे कतरस्मिन् देवसख्ये समानाख्यानतायां देवसायुज्ये इत्यर्थः । वक्ष्यति हि-याँ याँ हि देवतां निराह, तस्यास्तस्यास्ताद्भाव्यमनुभवति" इति । अथवा देवसख्ये रमणीये स्थाने, देवलोके इत्यर्थः । किम् ? इति स्थिरम् अविचालिनम् अप्रच्यवनधर्माणम् । कमेवमाहु ? विपीतार्थम्, आपीतार्थं गृहीतार्थमित्यर्थः । क एवमाह ? इत्येव वाक् ऋक्-संहिता । किञ्च नैनं हिन्वन्त्यपि वाजिनेषु । एनं वागर्थज्ञं न हिन्वन्ति नाननुगन्तुं शक्नुवन्ति । केषु ? वाजिनेषु वाग्ज्ञेयेषु अर्थेषु बलवत्स्वपि दुर्ज्ञेयेषु दुरवघटनीयेषु समुद्रनिहितरत्नसन्निभेषु देवतापरिज्ञानादिषु व्याकर्त्तव्येषु । स हि तान् व्याकर्तुम शक्नोति, नेतरे मन्दबुद्धयो बहवोऽपि समागता शक्नुवन्ति तानर्थान् व्याकर्त्तुम्, यान् असौ व्याकरोति । अत एतदुक्तम्—नैनं हिन्वन्त्यपि वाजिनेषु । अप्येवं तावदर्थज्ञः प्रशस्तः ।

अथेदानीमविद्वानुत्तरेणार्द्धर्चेन निन्द्यते-अधेन्वा चरति । अधेन्वा ह्येष चरति न हि सा वाक् हिनोतीह न परत्र च यस्या अर्थो न परिज्ञायते । तथा गृहीतयैव नामधीयानं इतश्चेतश्चरति तत् प्रधान एव सर्वत पर्य्यटतीत्यभिप्रायः । किञ्च मायर्यैष चरति गृहीतया यथा हि कश्चिन्मायया सुवर्णं विभृयात्, एवमयं वाचमेव सवाग्बिभर्ति । सा तादृशी भ्रमणा वाक् किं करोति ? तस्मै कामान् दुग्धे । कतमान् ? ये तस्याः वाचो दोग्धव्याः ; क्व ? "देवतास्थानेषु मनुष्यस्थानेषु च । यः किं करोति ? य एवं शुश्रवान् श्रुतवान् भवति । कथम् ? अफलामपुष्पामिति । एवं यः श्रुतवान् भवति, एभ्यः सकाशात् श्रुत्वा च दृढ़ग्राहेण गृहीत्वावस्थितो भवति, अध्ययनादृते नान्यदस्ति वाचि किञ्चित् मृग्यमिति । तस्मै किम् ?

इति "अफलैवास्मा अपुष्पा च वाग् भवतीति । यथैव ह्यसौ पश्यति अफलेयमपुष्पा चेति तथैव भवतीत्यभिप्रायः । तथा च मनुनाऽप्युक्तम्—

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।।"

तथा च पौराणिकैरुद्गीयते—

"योऽधीत्य विधिवद् विप्रो वेदार्थं न विचारयेत् ।
स च लोके शूद्रसमः पात्रतां न प्रपद्यते ।।
वेदस्याध्ययनं सर्वम् धर्मशास्त्रस्य चापि यत् ।
अजानतोऽर्थम् तत्सर्वम् तुषाणा कण्डन यथा ।।
पाठमात्ररतास्नित्यं द्विजातीश्चार्थवर्जितान् ।
पशूनिव च तान् प्राज्ञो वाङ्मात्रेणाऽपि नार्चयेदिति

व्याकरणशास्त्रम् आयुर्वेद इव वाङ्मलानां चिकित्सकः, सर्वविद्यादृतः सर्वविद्यापवित्रः सन् मोक्षाख्यपरमपुरुषार्थप्राप्तये एकः सरलः पन्था । लोके सर्वाः विद्याः शब्दैर्निबद्धाः, अत सर्वासां विद्यानां शक्तिग्राहकः सन् व्याकरणम् वेदज्ञानद्वारा मोक्षस्य द्वारम् वर्तते । किञ्चेदम् मोक्षङ्कामयमानानाङ्कृते सिद्धिसोपानपर्वणामाद्यम्पदस्थानम्, अकुटिलो राजमार्गश्च वर्तते, ततश्च ब्रह्मसाक्षात्कारो जायते । तथा चोक्तम् वाक्यपदीये ब्रह्मकाण्डे—

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यम्प्रकाशते ।।
यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ।।
इदमाद्यम्पदस्थानम् सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।।
अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ।।
प्रत्यस्मितभेदाया: यद्वाचो रूपमुत्तमम् ।
तदस्मिन्नेव तमसि ज्योतिः शुद्धम्प्रवर्तते ।।"

वाक्यपदीये ब्रह्मकाण्डे श्लोक १४, १८।।

—o—

अंगारों पर दहक रही है........

महावीर 'नीर' विद्यालंकार

अंगारों पर दहक रही है, चिता आज अरमानों की।
मंझधारों में भटक रही है, किश्ती आज दीवानों की।।
आज सूर्य को फिर से, देखो, तिमिर आँख दिखलाता है।
जीवन के हर स्वर्णिम पथ पर, कौन धुंध छिटकाता है।।
दीवारों पर लटक रही है, कथा आज बलिदानों की......
कहीं किसी की उमर बिक रही, चाँदी की टकसालों में।
कहीं किसी की भूख बिक रही, गली मौहल्ले वालों में।।
बाजारों में तड़प रही है, लाश आज कुछ दानों की......
नाच-रंग की लगी चौकड़ी, मस्त हुए पीने वाले।
रिश्वत, चोर-बाजारी पनपी, बढ़े दुष्ट, धंधे-काले।।
अखबारों में निकल रही है, कथा दुष्ट नादानों की......
दिशा-भ्रमित से भटक रहे हैं, लक्ष्य सुनिश्चित नहीं अपना।
दयानन्द, गाँधी, गौतम का, दलित हो रहा सब सपना।।
दरबारों में सिसक रही है, अर्थी उन परवानों की......
माँग किसी की भरने वाले, स्वयं माँग कर बैठे हैं।
लाज किसी की ढकने वाले, स्वयं लाज खो बैठे हैं।।
आचारों में झलक रही है, कुण्ठा अब इन्सानों की......
हर क्यारी में फूल खिले हैं, सब खेतों में पानी है।
शस्य-श्यामला धरणी लेकिन, फिर भी क्यों कंगाली है।।
अंधियारों में भटक रही है, दिशा आज निर्माणों की.......
'नीर' आज बोझिल जीवन का, भार हो रहा हर मानव।
दुर्लभ है अमरत्व कथा अब, व्यथित घूमता हर मानव।।
व्यवहारों में दीख रही है, व्यथा-कथा मस्तानों की.......

—•—

श्रद्धेयाचार्यवर्यस्मरणम्

येषां संस्मरणं सुशान्तिजनकं, सत्स्फूर्तिसन्दायकं
येषां दर्शनमेव नित्यमभवत्, क्लैब्यस्य विद्रावकम् ।
येषां संगतिरत्र कोटिमनुजान्, प्रारक्षयत् पापतः,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥१॥

येऽस्माकं जननीसमा हि पितरः, सच्छिक्षकाग्रेसराः,
नित्यं नो हितचिन्तकाः सुसुहृद , सद्बान्धवा. सौख्यदाः ।
शिष्येभ्यो निखिलेभ्य एव सततं, सर्वस्वभूता हि ये,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥२॥

शिक्षायाः कुदशां विलोक्य भुवने, चारित्र्यसन्दूषणीं,
यैः संस्थापितमेव सद्गुरुकुलं, भागीरथी रोधसि ।
सोढं सर्वविधं हि कष्टमतुलं, भग्नं परं नो व्रतं,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥३॥

चारित्र्यस्य धनं शुभं ह्यनुपमं, तद्रक्षणीयं सदा,
सम्पाल्यं सकलैः सुशक्तिजनकं, सद्ब्रह्मचर्यंव्रतम् ।
इत्थं लोकहितेच्छयाऽखिलजनान् योऽबोधयन् सर्वदा,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥४॥

देवस्यैव सुता यतोऽखिलजनाः, प्रीत्याऽवलोक्याः समे,
ह्यस्पृश्यो न हि कोऽपि जातु भुवने, जात्या विभाव्यः क्वचित् ।
ह्यस्पृश्यत्वनिवारणार्थमनिशं, यत्नं शुभं कुर्वतः,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥५॥

भक्ताः स्युः जगदीश्वरस्य सकलाः, सद्देशभक्ताः समे,
वृत्तिं त्यागमयीं विधाय विमलां, देवस्य सेवारताः ।
इत्थं यैर्भरिता स्वशिष्यनिवहे, सद्भावना निश्चला,
श्रद्धानन्दमहोदयान्, गुरुवरान् वन्देऽतिभक्त्या युतः ॥६॥

हा हन्तेह न तादृशा गुरुजनाः, अद्यावलोक्याः क्वचित्,
प्राणेभ्योऽप्यधिकं प्रियं गुरुकुलं नादर्शरूपे स्थितम् ।
दद्याच्छक्तिमनी शिवः प्रचलितुं, श्रद्धेयगुर्वध्वनि,
श्रद्धानन्दमहोदयान् गुरुवरान्, वन्देऽतिभक्त्या युतः ॥७॥

विनयावनतः—

धर्मदेवो विद्यामार्त्तण्डः (देवमुनिर्वानप्रस्थः), आनन्दकुटीरम्, ज्वालापुरम् ।

आयुर्वेदोक्ताः केचन सिद्धयोगाः

विद्याभूषण: श्रीगणेशराम शर्मा

ज्वरे न किञ्चित् परमं किरातात्,
तद्वन्न शुण्ठ्या ह्यतिसाररोगे।
न तक्रतुल्यं ग्रहणीविकारे,
ह्यर्शोविकारे विजयापरं न ॥१॥

अर्थात्–ज्वरोपशांतये किरातात् (चिरायता इति ख्यातात्) औषधात् परं किञ्चिदपि चौषधं नास्ति। अतिसाररोगे शुण्ठ्या: (सोंठ) परतरं किमप्यौषध नास्ते। सग्रहणीति ख्याते विकारे तक्रसमानं किञ्चिदप्यन्यदौषध नास्ति, एवमेव हि ह्यर्शोविकारे (बवासीर) विजयातोऽर्थाद्धरीतकीत: परम किमप्यौषधं पृथिव्यां न विद्यते ॥१॥

अजीर्णरोगे न हरीतकीत-
स्तद्वद्विषूच्यामथ निम्बुनीरम्।
रसोनकं सालसके गदे हि,
विलम्बिकायामथ काञ्जिकं तु ॥२॥

अजीर्णे हरीतकीत. श्रेष्ठमोषध नान्यत् किमपि भवितुमर्हति। तथैव विषूच्यां (हैजा) निम्बुफलस्य रसाच्छ्रेष्ठतर किञ्चिदपि नास्ति। सालसकाख्येऽजीर्णभेदविशेषे रोगे रसोनक–लशुणं–श्रेष्ठमोषधम्। एवमेव विलम्बिकाख्येऽत्युग्रेऽजीर्णरोगे काञ्जिकं (कांजिया) सर्वोत्तममौषध भवति ॥२॥

जन्तुघ्नमन्यच्च तथैव जन्तु-
रोगेष्वथ चौषधं पाण्डुरोगे।
गोमूत्रमेकं त्वथ कामलासु,
फलत्रयं मूलकशाकभाज्यम् ॥३॥

सर्वेष्वपि कृमिरोगेषु जन्तुघ्नं–वायविडंग इति सर्वश्रेष्ठमौषध वर्तते। पाण्डुरोगे खल्वेकमात्र गोमूत्रमेव हि सर्वोत्तममौषधं भवति। कामलासंज्ञके रोगे त्रिफला तथा मूलकशाकमुत्तममौषध प्रोक्तमास्ते ॥३॥

हलीमके रेचनकं च तीव्रं,
वासा तथा लोहितपित्तरोगे।
कासेषु सर्वेषु च कण्टकारी,
श्वासेषु भार्ङ्गी विदितप्रभावा। ४॥

हलीमकाख्ये पाण्डुरोगस्य प्रोग्रतरे रोगे तीव्र हि विरेचनमुत्तमौषध भवति। रक्तपित्ताख्ये रोगे वासा (अडूसी) वासा, सर्वविधेषु कासरोगेषु कण्टकारी (भोयरेंगणी) तथा च श्वाससम्बन्धिषु सर्वेषु रोगेषु भारंगमूल सर्वोत्तममौषध भवति ॥४॥

नारीपयोनस्य विधानयोगो
हिक्काविनाशाय च रेचनं वा।
उरोगदे चार्जुनसाधितं स्याद्
घृतं तथोरः क्षतजेषु मांसम् ॥५॥

हिक्का (हिचकी) रोगोपशातये स्त्रिया स्तनदुग्ध नस्यरन्ध्रयो पातित महदुपकरोति किंवा रेचनमपि भवत्यौषध लाभकरम्। हृदयरोगेऽर्जुनवृक्षस्य त्वचा साधित घृत नाम परमौषध भवति तथा च उरसोऽन्तर्भागे जातानां क्षतानां शातयेऽजामांस सद्य. प्रभावकर स्यात् ॥५॥

यक्ष्मामये छागपयोऽजमांसं,
छागं घृतं छागनिवासवास:।
मूर्च्छासु शीताञ्जनसेकलेप-
सुपुष्पनीराणि च कीर्तितानि ॥६॥

क्षयरोगेऽजाया दुग्ध, तन्मांस, तद्घृत तथाऽजानां निवासस्थाने ताभि: सह निवासोऽस्ति सर्वोत्तममौषधम्। मूर्च्छायां च शीतमञ्जन, शीतलं जलं, शीतजलसेचन, शीतलो लेप:, सुगन्धीनि पुष्पाणि तथा च शीतानि सुगन्धयुक्तानि जलानि चातीव लाभकराणि संसिद्धयन्ति ॥६॥

दुरालभाषयः शृतं घृतान्वितं सशर्करम् ।
भ्रमे पिबेदसंशय तथा गवां पयः स्मृतम् ॥७॥

भ्रमरोगे दुरालभाख्यस्य (धमासा) उष्ण दुग्ध, घृतेन-सहित शर्करायुक्त च पेयमेवमेव गोदुग्धमपि पातव्य तेन भ्रमरोग. शाम्यति ॥७॥

मांगल्यपुष्पोत्स्वरसं द्विटङ्कं,
छर्दिघ्नं मारिचचूर्णयुक्तम् ।
सुवर्णलोहैः सिकताभिरुष्णं-
निर्वापितं तर्षहरं जल स्यात् ॥८॥

वमनरोगे टङ्कद्वयप्रमाण (तोलाप्राय.) मागल्य-पुष्प्या--शखावल्या. स्वरसः प्रभावशाली भवति । तप्तेन सुवर्णेन, लोहेन, सिकताभिर्वा निर्वापित जल तृड्दाहमुप-शामयति ॥८॥

सहस्रधा धौतघृतेन दाहो
विनाशमायाति विलेपनेन ।
उन्मादरोगे सुमनोधिवास-
सितां च कूष्माण्डकमाशु खादेत् ।९॥

सहस्रवार धौतेन घृतेन लेपकरणाद्दाहपीडा विनश्यति। उन्मादरोगे-चित्तविक्षेपे च सुमनोगन्धभाविता सिता-शर्करा (गुलकन्द इति प्रसिद्धा) भक्षयेद्वा कूष्माण्डं (श्वेत) सेवेत ॥९॥

सशर्करं हृय्यमुशन्ति मद्य-
पानात्ययेऽत्युग्रमथाहिफेने ।
भङ्गाभवे चाम्लरस विशेषा-
दुन्मत्तजे गोपयसा सितां च ॥१०॥

अत्यन्त मद्यपानादुद्भूते रोगे-आयुर्वेदज्ञाः शर्करया सह घृतसेवनमिच्छन्ति तथा चाहिफेनसम्भवे भङ्गारससेवनोद्भवे रोगे विशेषतः शर्करया साकमम्लरससेवन समर्थयन्ति। अर्कभक्षणेन जाते रोगे गोदुग्धेन सह शर्करासेवनमिच्छन्ति१०

विषेऽशिते च्छर्दनमाशु कुर्या-
च्छिराविमोक्षं सविषैः प्रदष्टे ।

भृङ्गीविषे वृश्चिकमक्षिकादि-
विषे घृतं सैन्धवचूर्णतप्तम् ॥११॥

यदि विष भक्षित भवेत्तदा वमनं कुर्यात् । सर्पादिभिः सविषैर्जन्तुभिर्दष्टे शिराविमोक्षण कारयेत् । भृङ्गीमक्षि-कावृश्चिकादीना दशे सैन्धवलवणस्य चूर्ण घृते परिपच्य दशविषप्रभाविते स्थाने लेपयेत् ॥११॥

विमर्द्यमेतद्विषनाशनाय
तत्र प्रदेशे खलु यत्र दष्टम् ।
व्याघ्रादिहिस्रैर्नखदन्तघाता-
ज्जाते विषे चित्रकनीरपानम् ॥१२॥

व्याघ्रचित्रकभल्लूकशृगालश्वादीनां नखायुधानां श्वापदाना नखैर्दन्तैर्वा जाते विषे चित्रकनाम्न औषधस्य जलं निर्गाल्य पातव्यमथवा चित्रकस्य क्वाथं परिपच्य पीयताम् ॥१२॥

अङ्कोलपत्राणि जलेन पेष्य
मारीचचूर्णेन समं पिबे : ।
विषं निहन्त्याशु शुनः प्रमत्तता
प्रजायमानस्य च दन्तजातम् ॥१३॥

अङ्कोलाख्यस्यौषधस्य पत्राणि जलेन सम्पेष्य मरीचानां चूर्णेन साकं भक्षणाच्छुनो भक्षणादुद्भूत विष अलर्काख्य प्रशममेति ॥१३॥

निर्गुण्डिवन्दाकमपस्मृतिघ्न
संसेवनान्नस्यविधानयोगैः ।
वातेषु च योगराजपूरं
रसोनं तिलतैलमुष्णम् ॥१४॥

निर्गुण्ड्या मूलस्य तथा वंदोनाम्नो वनस्पतेश्चूर्णं विधाय नस्यमिव नासारन्ध्राभ्यामासेवनाद् वातविकारः शाम्यति । योगराजगुग्गुलस्तथा च लशुन. सर्वेष्वपि च वातरोगेषु हितकर भवति । उष्णद्रव्याणि सर्वाणि तथा तिलानां तैल च वायुरोगे भक्षणान्मर्दनाच्च लाभः स्यात् ।१४

कफोत्थरोगेऽखिलेषु शुण्ठी
विरेचनं पित्तभवेषु तद्वत् ।

कुष्ठादिरोगेषु च निम्बजातं
पञ्चाङ्गमद्यान्मधुना तदर्कम् ॥१५॥

कफजन्येषु सर्वेष्वपि रोगेषु शुण्ठी तावत्सर्वश्रेष्ठमौषध भवति, तथैव पित्तोद्भवेषु सर्वेष्वामयेषु विरेचन नाम सर्वोत्तममौषधं भवति। कुष्ठादिषु सर्वेषु चर्मरोगेषु निम्बस्य पञ्चाङ्गस्वरसो मधुनासह ससेव्य: ॥१५॥

शोथेषु सर्वेषु च मत्स्यपित्त-
मद्यात्सुगोमूत्रयुतं मनुष्य: ।
तथोदरेष्वाशु निषेवितव्यं
क्रमेलिकाया: पयसोऽनुपानै: ॥१६॥

अथ सर्वेष्वपि च शोथेषु मनुष्येण गोमूत्रेण सह मत्स्य-पित्त (कट्वाख्यं) भक्षयेत् तथैव सर्वेष्वप्युदररोगेषु कटु इत्यौषधसेवनात्तत्कालमुष्ट्र्या दुग्धं पेयम् ॥१६॥

फलत्रिकं त्र्यूषणसैन्धवाभ्यां
करञ्जबीजेन सरामठेन ।
गन्धर्वहस्तोत्थजटाकषायं
पेयं हि शूलेषु च निर्विशङ्कम् ॥१७॥

शूलपीडायां त्र्यूषणेन–मरीच-शुण्ठी-पिप्पलीति–सैन्धव रामठं (हींग) एतै: सहित त्रिफलायाश्चूर्णं करञ्जबीजै. सह निषेवणीयम् तदुपरि एरण्डमूलस्य क्वाथो नि.शङ्कं पेय: । एवं कृते शूलपीडाऽपसरति ॥१७॥

गुडूचिकाया: स्वरस: प्रमेह-
रोगेषु पेयो मधुना समेत: ।
तद्वन्महानिम्बफलस्य मज्जा
फलत्रिकं माक्षिकसंयुतं वा ॥१८॥

प्रमेहरोगेषु सर्वेष्वर्थान्मूत्रकृच्छ्रेषु गुडूचिकाया: (गिलोयेतिख्यातायाः) स्वरस: पातव्यस्तथैव महानिम्बस्य (बकायननीम) बीजानां मज्जा (मेजं) किंवा त्रिफला मधुना सह संसेवनीया ॥१८॥

दिङ्मूलमाशु त्रिफलासमेतं
तृणप्रभूतं वरुणत्वचा च ।
सितासमेतं क्वथितं निषेव्यं
मूत्रादिकृच्छ्रेष्वखिलेषु नित्यम् ॥१९॥

सर्वविधेषु मूत्रकृच्छ्रेषु त्रिफलया सह पञ्चतृणानि–दर्भ:, कास:, इक्षु:, सर:, शालश्चेति–तथा च दशमूलक्वाथ-स्तानीमानि वरणवृक्षस्यान्तस्त्वचा सह क्वथितानि कृत्वा शर्करामिश्रितानि विधाय सद्य एव हि नित्य पिबेत् ॥१९॥

गुडूचिकाया: स्वरस: प्रमेह-
रोगेषु पेयो मधुना समेत: ।
तद्वन्महानिम्बफलस्य मज्जा
फलत्रिकं माक्षिकसंयुतं वा ॥२०॥

मूत्ररोगेषु मधुना साक गुडूचिकाया. स्वरस पिबेत् । तथैव मूत्रकृच्छ्रेषु महानिम्बस्य (बकायननीम) फलाना बीजानि मधुना सह खादेदथवा त्रिफला लिह्यात् ॥२०॥

भल्लातकासीसहुताशसूर्य-
दुग्धप्रलेपादथ गण्डमाला ।
विनाशमायाति पुरेण सार्धं
क्वाथं पिबेत् काञ्चनशत्रुत्वग्जम् ॥२१

भिल्लातक, सोसक, (हीराकसी) चित्रक तथा च अर्कदुग्धमित्येतेषा सर्वेषा प्रगाढलेपेन गण्डमाला (कठमाला) प्रशम व्रजति । तथैव काञ्चनारस्य त्वचा क्वाथ गुग्गुलेन सह पिबेत्तदापि कण्ठमाला प्रशाम्यति ॥२१॥

स्फोटेषु सर्वेषु च पुत्रजीवा-
बीजोऽस्थमज्जा तु जलेन लेप्या ।
भगन्दरादि व्रणनाशहेतो:
फलत्रिकक्वाथमल पुरेण ॥२२॥

साधारणेषु सर्वेषु व्रणेषु जीवापोतस्य गुटिकायास्तथा च तद्बीजाना जलेन सह लेपो विधेय: । भगदरादिषु व्रणेषु त्रिफलाया: क्वाथो गुग्गुलेन सह तदुपशांतयेऽल भवति ।२२

अपादिकानाशकरं घृतं च
समन्मथं सैन्धवदेवधूपै: ।
मधुप्रकर्षाद् व्रणलेपनात्तु
सपूरणाच्चापि व्रणघ्नमाशु ॥२३॥

सैन्धवलवणेन सह रालद्रव्येण मन्थयेत (मोम) सह गोघृतस्य लेपेन अपादिकारोगः (बाई) शाम्यति। मधुनो विशेषमात्रां प्रक्षिप्य लेपेनापादिका शीघ्रतर विनश्यति ।२३

यवानिकयुग्मयुताजमोदा
फलत्रिकं पारदगन्धकैलाः।
गुडं पुराणं च समं विनेकं
प्रकुट्य कुर्याद् वटिकां मनुष्यः ॥२४॥
माषद्वयैकां नवनीतगर्भे
कृत्वा गिलेत्तां तु जलानुपानैः।
रूक्षान्नमण्णल्लवणं विहाय
जयेत् फिरङ्गाख्यगदं जवेन ॥२५॥

खुरासानदेशोद्भवोऽजमोदो बोडीत्याख्योऽजमोदश्च त्रिफला,पारदो,गन्धक, एला तथा च पुराणो गुड इत्येतानि सर्वाणि प्रकुट्य माषधान्यस्य कणद्वयप्रमाणा गुटिका साध्या, ता च गुटिका नवनीतेनावृत्य जलेन सह गिलेत्। अस्याश्चिकित्साया समये लवण परित्यज्य रूक्षमन्न भक्षयेत्। एव कृते फिरङ्गनामा रोगो विनश्यति ।२४।२५।

ईशाश्मतुत्थविजयायमनैः समानै-
र्धूपः सपत्रबदराग्निसमुत्थितस्तु।
लिङ्गक्षतेषु नियतं परिसेव्यमानो
दूरीकरोति सहसा सहसोपदशान्।२६

पारदो मनःशील (मेणसल) हरीतकी, तुत्थ (मोर-थूथा) तथा च यमनं सर्वाणीमानि समभागे गृहीत्वा बदरीवृक्षस्य पत्रैरर्द्द पितेऽग्नौ प्रक्षिप्य नियमेन जननेन्द्रिये जातेषु व्रणेषु धूपग्रहणाद् व्रणा शीघ्रमेव विनश्यन्ति ॥२६

तुत्थं सतिक्तं परिमर्द्य खल्वे
नीरेश्च निम्बुप्रभवैर्दिनैकम्।
भुक्त्वा वटीं माषमितां च तस्य
हन्यात् फिरङ्गाख्यगदं विशेषात्॥२७॥

निम्बुफलस्य रसेन सह मरीचान् तुत्थ च खल्वे दिन-मेकं परिमर्द्य नागवल्लीदलानां रसेन माषकणप्रमाणां गुटिकां ससाधयेत्। तां च गुटिकां गिलेत्। तथा कृते फिरङ्गनामा रोगो विनश्यति॥२७॥

कर्पूरमेलामरिचानि जाती-
पत्राणिपुष्पाणि दिवौकसां च।
खल्वे विमर्द्याथ सुनागवल्ली-
दलोत्थनीरैर्गुटिकाः प्रकुर्यात् ॥२८॥
कर्कन्धुमात्रा नवनीतगर्भे
कृत्वा गिलेत्तासु पुमानथैकाम्।
दुग्धौदनं पथ्यमल प्रकुर्या-
द्यस्तूपदशं विलिहन्ति शीघ्रम् ॥२९॥

कर्पूर, एला, मरीचानि, जातीपुष्पाणि (चमेली) पत्राणि तथा देवपुष्पाणि (लवङ्ग) एतानि सर्वाणि खल्वे परिमर्द्य नागवल्लीपत्राणा रसेन साक गुटिका बदरीफल-प्रमाणा विरचयेत्। ता च गुटिका यो नवनीतेनावृत्य भक्षयति दुग्धौन (दूध और भात) च खादति तस्य जननेन्द्रियस्य व्रण (उपदश) शीघ्रमेव प्रशाम्यति।२८।२९

सुनागफेनशाणपत्रहिङ्गुलार्कमूलकैः
सुबोधिनीत्वचा समं भुजङ्गवल्लिपत्रजैः।
रसैर्विधाय चक्रिकां विशोष्य धूमपानगां
पिबेन्मुखेन धूममाशु चोपदंशनाशनम् ॥३०॥

अहिफेन, शाणपत्राणि (सनइत्याख्यस्य) हिङ्गुल, अर्कवृक्षस्य मूलानि तथा च सुबोधिन्यास्त्वचः समभागे गृहीत्वा नागवल्लीपत्राणा रसेन चक्रिका (टिकड़ी) विधाय शुष्कां च कृत्वा धूमपानविधिना (चिलम पर रखकर) मुखेन तस्या धूमपानादुपदशस्य नाशो भवति।३०

अञ्जन-लेपन-नस्यविधानतो
घृतमलं विमलं च शिरोगदे।
त्रिफलया मधुना निशि भक्षितं
विजयते ऽयतेऽक्षगदं बलात् ॥३१॥

शिरोरोगे स्वच्छ घृत भक्षणीयम्। निर्मलस्य घृतस्य लेपः कर्त्तव्यस्तथा स्वच्छघृतस्य नस्य मेव्यम्। रात्रौ त्रिफलया मधुना च सह घृतस्यावलेहनान्नेत्ररोगाः सद्य. प्रशाम्यन्ति॥३१॥

अपि च निम्बजबीजजतैलकं
यदि च प्राणगतं खलु नस्यवत्।

अखिलपीनसनाशकरं क्षणा-
त्रिगदितं विदितं खलु पण्डितैः ॥३२॥

निम्बस्य बीजाना तैलं यदि नस्यवन्नासापुटाभ्यां सेव्येत, तदा तत् क्षणादेव पीनसरोगं (प्रतिश्याय) विनाशयतीति प्रोक्त जानते पण्डिताः ॥३२॥

मुखगदेष्वखिलेष्वहिवल्लरी-
दलजवीटिकया क्रमुकाधिकम् ।
अशितमाशु गलग्रहनाशने
विजयते पटुनार्द्रकभक्षणम् ॥३३॥

सर्वविधेष्वपि मुखरोगेषु नागवल्या वीटिकया साकं पूगीफलादिसेवनं सद्यो लाभं कुरुते । लवणेन सहार्द्रकभक्षणाद् गलस्य रोगा नश्यन्ति ॥३३॥

उरसि चेद् गदपीडनमर्जुन-
प्रभववल्कलकल्कसुसाधितम् ।
घृतमलं भुजरोगहरीबला
समशिता क्वथिता गदिता ध्रुवम् ॥३४

हृदये यदि रोगो वा पीडा वा भवेत्तदाऽर्जुनवृक्षस्य त्वग्भिः साधितेनावलेहेन ससिद्धं घृतं तदुपशमायालं भवति । शर्करया साकं बलाख्यस्य (बलदाणा) औषधस्य क्वाथो हृत्तरोग--बाहुशोथादिक--शामयति ॥३४॥

जठरकुक्षिगदांश्च हरीतकी
विजयते लवणैश्च सरामठा ।
अपि च जानुगदेष्वखिलेष्वलं
हिततमं च रुबूकनिषेवणाम् ॥३५॥

लवणेन, रामठेन (हींग) च सह ससेविता हरीतकी सर्वानुदररोगान् कुक्षिरोगांश्च शमयति । पुनः सर्वेष्वपि च जानुरोगेषु एरण्डबीजानां तैलं सेवितं सर्वश्रेष्ठं हितकरमौषधं भवति ॥३५॥

पादप्रसुप्तेऽपि च वातरक्ते
शिराविमोक्षं प्रवदन्ति सद्यः ।
वैद्याः कषायं च गुडूचिकाया
रुबूकतैलेन समं हि पेयम् ॥३६॥

पादे प्रसुप्ते तथा च वातरक्ते वैद्यास्तत्कालं शिराविमोक्षणं तथा चैरण्डबीजतैलेन गुडूचिकायाः क्वाथः पेय इति वदन्ति ॥३६॥

स्त्रीरोगनाशाय कटङ्कटेरी-
भूनम्बभल्लाततिकाम्बुदानाम् ।
कषायकं वै रसजेन सद्यो
वासायुतानां प्रदरेषु पेयम् ॥३७॥

स्त्रीरोगाणा (प्रदरादीना) विनाशाय रसवन्त्या साकं, अडूसी-दारुहरिद्रा-किरात-भिल्लातक-तिल - नागरमोथानां क्वाथः पेयो भवति ॥३७॥

भूधात्रीस्वरसं सितायुतमलं
स्त्रीरोगनाशं क्षमं,
भृङ्गीमागधिकां विषांबुदभवं
चूर्णं तथा माक्षिकैः ।
बालानां कसने तथा श्वसनके
वान्तौज्वरे सर्वदा,
सेव्यं वा गजकेसरं च सघृतं
स्त्रीभिः परं गर्भदम् ॥३८॥

शर्करया सह भूतधात्र्याः (भोयरीगएौयस्या.) स्वरसः स्त्रीणां प्रमुखरोगाणामुपशमाय सक्षमो भवति । बालकानां कासे, श्वासे, वमने, ज्वरे च सृंगी (काकडाशीगी) पिप्पली, अतिविषस्य कलिका तथा च नागकेशर इत्येतेषां चतुर्णां चूर्णं नित्यं मधुना सह सेव्यम् । घृतेन सह नागकेशरस्यावलेहनात् स्त्रीणां गर्भस्थितिर्भवति ॥३८॥

यवानिकाचित्रकटुत्रयाणां
सहिङ्गुसौवर्चलसैन्धवानाम् ।
चूर्णैः षडंशैश्च रसोनकल्क-
स्तैलेन वातानशनान्निहन्ति ॥३९॥

हिंगु-संचल-अजमोद-चित्रक-मरीच-शुण्ठ-पिप्पल इत्येतेषां षड्भागास्तथा लशुनस्यावलेहस्तैरेतैः पूर्वोक्तैर्द्रव्यैः सह तैले विपच्य सेवनाद् वायुरोगाः शम्यन्ति ॥३९॥

रास्नानागरमेघवत्सकशठीतिक्तामृतावर्मभिः
पीयूषामरदारुनागचपला भूनिम्बवासेन्द्रजैः ।
क्वाथो यस्तु पटोलयासकयुत-
मंध्वन्वितः साधितः,
पीतश्चाशु निहन्ति रोगनिकरं
यत्सन्निपातोद्भवम् ।।४०।।

पटोल-धमासाभ्या सह रास्ना-शुण्ठी-नागरमोथा-कड़ात्वक्-कचूर-कटु-हरीतकी-पित्तपापडो-गुडचं -देवदारु-गजपिप्पल-किरात-अडुसी-इन्द्रजव इत्येतेषा क्वाथः शीतलता गतो मधुना साक पीत सन् सन्निपातोत्पन्नान् रोगान् सद्यः समूल नाशयति ।।४०।।

अलाबुकूष्माण्डजबीजमज्जा
मज्जा तथा त्रापुसबीजजाता ।
तथाब्जबीजप्रभवा त्रुटिश्च
लोध्रेन्दुना वं स्थलकञ्जपुष्पैः । ४१।।

वटप्ररोहामलचन्दनैला
मुक्ताफलं वशजविद्रुमे च ।
उशीरमात्मीयसुरोचनाढ्यं
शृङ्गाटकं यामनदेशजातम् ।।४२।।

कबाचिनीकेसरकोलमज्जा
मूलं च कासस्य च कासबीजैः ।
[1]कुस्तुम्बरीदाडिमबीजनैरं-
मंथैस्तथा वा बहुबीजजातैः ।।४३।।

आलोड्य संपेष्य समानमस्य
कर्षप्रमाणा मधुकोत्यसत्वैः ।
उद्धूल्य चोद्धूल्य सुचाक्रिकास्तु
कार्यास्तु तासामपि चैव नीरे ।।४४।।

वसु प्रमाणे निशि चोषितंकां
प्रातः पिबेत्तां सितया समेताम् ।
रुग्दाहनाशाय मधुप्रयुक्तां
मनोगदे लोहितपित्तरोगे ।।४५।।

पित्तप्रभूताखिलरोगहर्ता
हिमस्तदः सेव्यतमो मनुष्यैः ।
सद्धर्मकर्माणि शिवार्चनानि
निषेवितव्यानि हरेश्च नाम ।।४६।।

अथात्र रक्तपित्तसम्भवरोगाणामुपशातये काचिद् वटिका तथा नया साधित हिमजल चोच्यते—

लोध्रः, कर्पूर, स्थलकमल, पाटला, कूष्माण्डबीजानामन्तस्तत्व, कमलफलानामन्तःसारः, एला, वटस्याङ्कुरा, आमलकीफलानि, स्थूला एला, मुखड, मौक्तिकम्, वशलोचनम्, परवालः, वालः, गोरोचनम्, यवनदेशोद्भवानि शृगाटकानि (अफगानी सिघाडे) कबाचिनी, केशरः, बदरीफलाना बीजानि, दर्भबीजै सह दर्भमूलानि एतान्यौषधानि कुस्तूम्बर्या (धनिया) तथा दाडिमस्य कलिकाना बाहुज (चीमड़ा) मथे समालोड्य सर्वाणीमानि सम्पेष्य तत्समानताम्बूलमूलस्य चूर्णेनावृत्य तोलाप्रमाणा गुटिका. ससाध्या । तामेका गुटिकामष्टगुणे जले रात्रौ जले स्थापयेत् । तज्जल प्रात. शर्करया साक पिबेत् । तथा कृते पीडा ज्वलन च प्रशाम्यत । मनोरोगे तथा च रक्तपित्ते तस्या वटिकाया मधुना सहोपयोग. कर्त्तव्यः । समस्तपित्तप्रधानरोगशामक तद्वटिकाजल (हिमजल) मनुष्यैः पातव्यम् । तथैव श्रेष्ठानि धर्मकृत्यानि कर्त्तव्यानि भगवन्नामानि च स्मर्तव्यानीति शम ।।४१ से ४६।।

---

१ 'अखण्ड-आनन्द' इति गुर्जरभाषाया मासपत्रस्य सन् १९७४ वर्षस्य ऑक्टोबरमासस्य दीपोत्सवाङ्कात्साभारम् ।

अश्वघोषस्य प्रतिभानम्

श्री निगम शर्मा

कलं प्रणेदुर्मृगपक्षिणश्च
शान्ताम्बुवाहाः सरितो बभूवुः ।
दिशः प्रसेदुर्विमले निरभ्रे
विहायसे दुन्दुभयो विनेदुः
१.२६ ॥

कीदृशं मनस ओज्ज्वल्यं, चेतनायाः प्रसन्नता, श्रद्धोन्नतायाविवेकबुद्धेः समाधिः । स एव राजा शून्यशून्यमिव जगद् विलोपन् स्वकीयं तुरङ्गमं पृच्छति—

प्रचक्ष्व मे भद्र तदाश्रयाजिरं
हृतस्त्वया यत्र स ये जलाञ्जलिः ।
इमे परीप्सन्ति हि तं पिपासवो
ममासवः प्रेतगति पिपासवः
ब्र.च.८.८० ॥

अन्यत्र च सौन्दरानन्दे नन्दो नन्दनचारिणीं देवतामिव हृदयानन्दजननी नन्दयन् प्रश्वासवायुना दर्पणं मलीयसं विधाय कोपभ्रुकुटिं द्रष्टुमक्षमो मूर्ध्ना प्रियायाश्चरणयो र्ननाम ।

सा तं स्तनोद्वर्तितहारयष्टि-
रुत्थापयामास निपीड्य दोर्भ्याम् ।
कथं कृतोऽसीति जहास चोच्चै-
र्मुखेन साचीकृतकुण्डलेन ॥
४.१६ ।

य एव कविरित्थं तरुणयोरन्तर्गतं भावमभिव्यनक्ति । स एव जराजर्जर कलेवरमित्थं वर्णयति, येन प्रतीयते रूपधारिणी जरैव स्थिता ऽस्मान् प्रतीक्षते—

छन्दको राजकुमारमुत्तरेणानुगृह्णाति—

पीतं ह्यनेनापि पयः शिशुत्वे,
कालेन भूयः परिसृप्रमुर्व्याम् ।
क्रमेण भूत्वा युवा वपुष्मान्,
क्रमेण तेनैव जरामुपेतः ॥
ब्र.च.३.३१

रूपस्य हन्त्री व्यसनं बलस्य,
शोकस्य योनिर्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणा-
मेषा जरा नाम ययैष भग्नः ॥
३.३० ।

यथा स्तनयित्नुघोषमाकर्ण्य तरुणोऽपि गोवत्सो भीत भीत इव कम्पते, तथा राजकुमार उद्विग्नचेताः समजनि । अस्यामेव चिन्तायां निलीनमानसः स्फोटस्योपरि पिटिकामिवापरां रोगपीडां पश्यति । कथयति च—

निवर्त्यतां सूत बहिः प्रयाणा
न्नरेन्द्रसद्मैव रथः प्रयातु ।
श्रुत्वा च ये रोगभयं रतिभ्यः,
प्रत्याहतं संकुचतीव चेतः ॥
ब्र.च. ३.४७

इत्थं यदेव कविना गृहीतं तत्सर्वं प्रकृतिपरिपोषाय एव । वाग्देवतावतारेण मम्मटेन यदेतदुद्टंकितम्–'अवलंकृती पुनः क्वापि' तस्य सुन्दरं योजनं समन्वयं च वयं कवेरश्वघोषस्य कृतौ पश्यामः । नात्रालंकाराश्चमत्कृतिहेतवोऽन्यकविवद् दरीदृश्यते ।

कालिदासो यादृशीं कविप्रतिभोद्भिन्नां नवां सुगन्धिदायिनीं वल्लरीमिव रसस्फीतां ग्रणोद्भूतामद्भुतां साधितवेशां सचमत्कारां नगरवधूमिव शिक्षितविनयां विलसदलंकारां कविरचनां कृतवान् । न तादृशी शोभाव्यञ्जनामश्वघोषस्य कृतौ वयं पश्यामः । तथापि अश्वघोषस्य कविता भ्रूविक्षेपपरिचयरहिता सहजोन्मेषदायिनी ग्रामवृषकवधूरिव नितरां प्रमोददायिनी ।

अश्वघोषस्य शैली नितरां सरला प्रसादात्मिका च। माधुर्यगुणानुरूपं वाक्यानां विनियोजनं येन चित्तं तत्कालमेव आर्द्रतां प्रयाति। कथोपकथनप्रसंगतः कविः प्रकरणस्य प्रभावातिशयं पुष्णाति। असित-महाराजयोः, गौतमच्छन्दकयोः, गौतमपुरोहितयोः, पितृपुत्रयोः अराडगौतमयोः, नन्दगौतमयोः, सुन्दरीनन्दयोश्च कथोपकथनानि द्रष्टुं योग्यानि। यत्र रतेः स्वभावस्य स्नेहस्य मानस्य यथार्थस्य शृंगारस्य च भावाः स्वत एवोल्लसन्ति।

बाह्यसौन्दर्यसाधनरूपं कवेर्नासीन्मनस्यलंकार-निरूपणवर्णनम्। तथापि उपमा-रूपकप्रभृतयः कतिचन एवालङ्कारा यथावसरं कविना प्रतिपाद्यस्य उत्तेजनार्थं स्पृष्टाः, उत्थापिताश्च। पिपासुं व्याघ्रं वर्णयन् कविराह-

व्याघ्रः क्लमव्यायत खेलगामी,
लाङ्गूलचक्रेण कृतापसव्यः।
बभौ गिरेः प्रस्रवणं पिपासु
दित्सन्पितृभ्योऽम्भ इवावतीर्णः॥
सौ. १०.१०।

तस्मिंश्च हिमवति किन्नर्यः वर्ण्यन्ते—

दरीचरीणामतिसुन्दरीणां,
मनोहरश्रोणिकुचोदरीणाम्।
वृन्दानि रेजुर्दिशि किन्नरीणां
पुष्पोत्कचानामिव वल्लरीणाम्॥
सौ. १०.१३।

कीदृशी शब्दानामत्र योजना, अनुप्रासस्यच्छटा, उपमायाश्च सौन्दर्यं नैपुण्यमावहति। बालप्रियत्वं क्वचिच्चमरः प्रदर्शयति—

चलत्कदम्बे हिमवन्नितम्बे
तरौ प्रलम्बे चमरो ललम्बे।
छेत्तुं विलग्नं न शशाक बालं
कुलोद्गतां प्रीतिमिवार्यवृत्तः॥
सौ. १०.११।

इत्थमश्वघोषः प्रकृत्या प्रकर्षतया कविहृदयत्वं परिपाति, परं शान्तात्मना बुद्धेनास्य चित्तं तथा प्रभावितं चाभिभूतं चास्ति येनायं काव्यन्यायं प्रति न न्यायमाचरति। अश्वघोषेण स्त्रीपात्राणि नितान्तं विलासजननान्येव चित्रितानि। कालिदासस्य भासस्य वा स्त्रीपात्रं गृहिणी, सचिवः, सखा, प्रिय-शिष्या इत्यादिकं गुणैरनर्घमस्ति, परमश्वघोषेण स्त्री कामुकी, विलासवती, मोहजननी, जन-नीराग-हेतुः, कामस्य अस्त्रम्, इत्येवमादिभीरूपैरनुचित्रिता। प्रतीयते प्रकरणविवरणात् प्रतिपाद्यस्य वा विशेषात्। तथापि केनचिदन्येनोपायेन रक्षया स्याद् कवीनां भारतीया परम्परा काव्यगुणेन। अन्यथा कविर्वाच्योभवति सताम्। यथात्रैव स्वमतां सुदतीं प्रियां रुदतीं परित्यज्य गतस्य नन्दस्य तां प्रति सर्वथैवोपेक्षा नोचिता। औचित्यनिर्वाहः कोऽपि कवेः कमनीयः प्रयासः। योभगवान् बुद्धो नारीणामुद्धारार्थं वेश्यालयं प्रत्यपि गच्छति, तत्र का हानिरासीद् भ्रातुरालयं प्रति गमने, तस्य प्रेषणे वा; अन्येन वा भिक्षुणा धर्मदेशनादाने।

एतदनौचित्यं सहृदयानां चेतसि उद्वेगं जनयति। अन्यच्च कविरश्वघोषः स्वकीयं करुणावतारं बुद्धं सर्वतः श्लाघ्यं मनुते। मनुतां वयमपि स्वीकुर्मः। परं यदा बुद्धो भगवन्तं संस्कृतेरुत्कर्षदायिनं महात्मानं रामं निन्दति, यं वयं मर्यादापुरुषोत्तमं मन्यामहे, तत्रापि बुद्धकृता निन्दा पीडयति भारतीयानां नो हृदयानि। बुद्धः कथयति—

गृहप्रवेशं प्रति यच्च मे भवा-
नुवाच रामप्रभृतीन् निदर्शनम्।

न ते प्रमाणं न हि धर्मनिश्चयं-
श्चलं प्रमाणाय परिक्षतव्रताः ॥
बु.च. ९.७७।

अद्यावधि श्रीरामचन्द्रं न कश्चन साहसं चकार वक्तुं यदयं 'परिक्षतव्रतोऽस्ति।' येन पितरं सत्यवादिनं कर्तुं कालकान्तारगह्वरं गृहमिवासादितम्, घोरैः राक्षसैः सह येन पुरुषपौरुषपरीक्षा प्रादायि, लोकरंजनार्थं येन प्राणेभ्योऽपि गरीयसी सीता कानने परित्यक्ता, यस्य जीवनं ऋषिभिस्तुल्यं विस्मयकरमानन्दजननं चासीत्, तं प्रति अयं प्रतिभार्दरिद्रो व्रतपरिक्षतमाह, सर्वथैवानुचितमेतत्।

एवमेव शिष्टानुमतं ऋषिभिर्निषेवितं शास्त्रमर्यादानुसाधितं संस्कृतिपरम्परामार्गमपि कविरयं हुनोति। प्राचीनानां बृहस्पति-विश्वामित्र-अम्बरीष-जनक-प्रभृतीनां निन्दोद्घोषेणैव बुद्धस्य गौरवं जागर्ति, इति कवेर्विचारो न प्रमाणकोटिमवतरति। यद्यपि बुद्धस्य समग्रं दर्शनजालं सांख्यस्यैव एकां धारां परिपुष्णाति तथापि तेन नात्र निन्दा प्रयोक्तव्या।

यद्यपीत्थं यत्र तत्र बहुत्र सन्ति वादजननानि कवेरश्वघोषस्य वचनानि तथापि शान्तरसस्य परिपुष्टिविषये यथाशक्ति कविना भूयान् प्रयासः कृतोऽस्ति। बुद्धेनाकृन्तहृदयत्वाच्च महती निष्ठा तस्मिन् व्यधायि कविना। अत एव काव्यमस्य हर्षिकरं स्वाध्यायोग्यं च। यदि कवि निर्दिष्टेषु स्थलेष्वपि यत्नवानभविष्यच्चेत्तर्हि नूनमेवास्य काव्यद्वयं अन्यान्यविकाव्यवत् प्रभूतां प्रतिष्ठामगाहिष्यत।

कवौ तु महती कल्पनाशक्तिरासीत्। यथा स्थाने स्थाने उदाहरणेषु प्रतीयते, परं प्रचारगुणैराक्रान्तत्वात् सम्प्रदायवृत्तित्वाच्च तत्प्रतिभानं भस्माच्छन्नाङ्गारवत् निर्जीवमिव वञ्चितमिव समजनि। ये गुणैः कविः कालिदासः कविकुलगुरुतामलञ्चकार, तानेव गुणांस्तिरस्कृत्य अयं कविः प्रचारकमात्रपदमलंकरोति। अन्यच्च--गौतमबुद्धः स्वजनकस्य राजधान्यां सम्यक्पूजासत्कारैराद्रितो भवति--नन्दस्तथा भ्रातरं तथागतं पश्यति--

अथ स पथि ददर्श मुक्तमानं
पितृनगरेऽपि तथा- गताभिमानम्।
दशबलमभितो विलम्बमानं
